## E Mukulam Annul Evaluation-2018

First Language Part I - Paper -I

**SANSKRIT**

STD-X

Time - 1½ Hours
Total Score - 40

**निर्देशाः -** ■ १५ निमेषाः समाश्वासकालाः। प्रश्नानां सम्यज्ज्ञानाय अयं कालः उपयोक्तव्यः।

■ प्रश्नान् निर्देशान् च सम्यग् अवगम्य एव उत्तराणि लिखत ।

■ उत्तरलेखने मूल्याङ्काः कालः च परिगणनीयाः।

■ विवर्तनप्रश्नाद् ऋते सर्वेषां प्रश्नानाम् उत्तरलेखने देवनागरीलिपिः उपयोक्तव्या।

**I) त्रयाणां प्रश्नानां समुचितमुत्तरं कोष्ठकात् निर्धार्य लिखत।** **3x1=3**

क) **कनकधारास्तवं** केन विरचितम्?

(कालिदासेन, श्रीशङ्कराचार्येण, माधवविद्यारण्यस्वामिना, त्यागराजस्वामिना)

ख) **वाच्यस्त्वया मद्वचनात्स राजा** - अत्र निर्दिष्टः राजा कः?

(शिशुपालः, श्रीरामः, शरभोजी, वाजश्रवसः)

ग) **विद्वदौषधम्** इति प्रसिद्धः ग्रन्थः कः?

(विद्वद्प्रदीपिका, नैषधीयचरितम्, औषधीनिघण्टुः, सत्यशोधनम्)

घ) सुराधिपः कः?

( नलः, इन्द्रः, शिशुपालः, दुष्यन्तः)

**II) अधोदत्तां पट्टिकां पूरयत।** **3x1=3**

| **धातु** | **क्त्वान्तम्** | **तुमुन्नन्तम्** | **ल्यबन्तम्** |
|---|---|---|---|
| **पठ्** | पठित्वा | ........... | **प्र**पाठ्य |
| **गम्** | गत्वा | गन्तुम् | **आ**...... |
| **स्मृ** | ........ | स्मर्तुम् | **सं**स्मृत्य |



www.shenischool.in To Join sheni blog news Group SMS your Name to 9447490316

**III -VI प्रश्नेषु त्रयाणाम् उत्तरं लिखत ।** **3x2=6**

**III) सूचनानुसारम् अधोदत्तश्लोकस्य गद्यक्रमं लिखत।**

क) आत्मानमेव मन्येत
कर्तारं सुखदुःखयोः।
तस्माच्छ्रेयस्करं मार्गं
प्रतिपद्येत न त्रसेत्।।

**सूचनाः -** सुखदुःखयोः ....... .......... एव.......। तस्मात्....... .......... .........। न......।

**IV) " भिक्षां दातुं वयम् असमर्थाः भवामः। " इति आशयप्रतिपादकं श्लोकं चित्वा लिखत ।**

**अ)** ददाति भिक्षां तु भवान् यदा तदा
न कारयेत्तूर्यनिनादमग्रतः ।
नृणां विलोकं स्तवनं च लिप्सवः
सभासु रथ्यासु च दाम्भिकाः यथा ।।

**आ)** विधिना खलु वञ्चिता वयं
वितरीतुं वटवे न शक्नुमः।
अपि भैक्ष्यमकिञ्चनत्वतो
धिगिदं जन्म निरर्थकं गतम् ।।

**V) उदाहरणानुसारं वाक्येषु योजयत।**

उदाः - श्रीशङ्करः मधुरैः स्तवैः लक्ष्मीं स्तुतवान्। कनकामलवृष्टिः च अभवत्।

**यदा** श्रीशङ्करः मधुरैः स्तवैः लक्ष्मीं स्तुतवान् **तदा** कनकामलवृष्टिः च अभवत्। ।

अ) मयूरः मेघगर्जनम् श्रुतवान्। सः नयनानन्दकरं नृत्तम् अपि अकरोत्।

**VI) अधोदत्तात् वाक्यात् लङ्-लोट् रूपौ विविच्य लिखत।**

" वत्स ! भवान् श्रद्धया पठतु " इति आचार्यः शिष्यम् अवदत्।

**VII) अधोदत्तां पट्टिकां पूरयत।** **3x1=3**

| **कविः** | **ग्रन्थः** | **विभागः** |
|---|---|---|
| .............. | अभिज्ञानशाकुन्तलम् | नाटकम् |
| श्रीहर्षः | ......................... | महाकाव्यम् |
| चरकः | चरकसंहिता | ............... |

**VIII. उदाहरणानुसारं सन्धिच्छेदं लिखत।** **1x1=1**

**उदा-** पितुरधोमुखी - पितुः + अधोमुखी।

क) पुनरपृच्छत् - .......... + ........ ।

**IX. उदाहरणानुसारम् एकपदं लिखत।** **1x1=1**

**उदा-** पुरुषोत्तमः - पुरुषेषु उत्तमः।

क) सचिवोत्तमः - .....................।



www.shenischool.in To Join sheni blog news Group SMS your Name to 9447490316

**X) अधोदत्तवाक्यात् प्रधानकर्म-अप्रधानकर्म च विविच्य लिखत ।** **2x1=2**

देवर्षिः पर्वतराजं पार्वतीं ययाचे।

**XI - XVI प्रश्नेषु चतुर्णाम् उत्तराणि लिखत ।** **4x4=16**

**XI) अधोदत्तां खण्टिकां पठित्वा जीवनचरितरूपरेखां पूरयत।**

**सञ्जयन्** इति पश्चात् प्रसिद्धः मलयालहाससाहित्यकारः १९०३ जूण् १३ तमे दिने तलश्शेरि देशे जनिमलभत। तस्य यथार्थनाम माणिक्कोत्त् रामुण्णि नायर् (एम्.आर्.नायर्) इत्यस्ति। ओतयोत्त् पारुवम्मा, माटाविल् चेरिय कुञ्ञिरामन् वैद्यर् इत्येतयोः पुत्रत्वेन जातः सः बाल्यादारभ्य कवितारचनायां समर्थो अभूत्। सर्वकलाशालाध्यापकः, निरूपकः, हाससाहित्यकारः इति विविधेषु कर्मक्षेत्रेषु स स्वकीयं वैदग्ध्यं प्रकटयामास। तिलोदकम्, हास्याञ्जलिः, सञ्जयन्, साहित्यनिकषम्, ओथल्लो विवर्तनम् इत्यादयः तस्य मुख्यकृतयः। क्षयरोगबाधया १९४३ सप्तम्बर् १३ दिने तस्य चत्वारिंशत्तमे वयसि स कालयवनिकायां तिरोबभूव।।

नाम - ..............................।

जननम् - ..............................।

पितरौ - ..............................।

कृतयः - ..............................।

तूलिकानाम - ..............................।

देहवियोगः - ..............................।

**XII) वृक्षभेदान् अधिकृत्य सूचनामुपयुज्य लघुटिप्पणीं लिखत ।**

**सूचनाः-** वृक्षायुर्वेदः - सुरपालः - चतुर्विधभेदाः - फलपाकान्तः - अन्तस्सारः ।

**XIII) सूचनानुसारं दुष्यन्तस्य स्वभावनिरूपणं लिखत ।**

**सूचनाः -** कालिदासः - अभिज्ञानशाकुन्तलं नाटकम् - पूरुवंषजः - पुत्रवात्सल्यम्- दयार्द्रहृदयः ।

**XIV) गद्यांशं पठित्वा सम्भाषणांशान् पूरयत ।**

त्यागराजसमीपं गत्वा केरलीयसङ्गीतविद्वान् षट्कालगोविन्दमारार् षट्कालेषु कीर्तनालपनम् अकरोत्। तस्य अनितरसाधारणं प्रयोगवैभवं दृष्ट्वा त्यागराजः विस्मितनोत्रोऽभवत्। क्षणेन त्यागराजस्य मुखकमलात् " एन्तरो महानुभावुलु.." इति पश्चात् प्रसिद्धं गानमेकं बहिर्जगाम।।

त्यागराजः - .....................! भवान् कुतः आगच्छति?

गोविन्दमारार् - नमस्ते।..................................................।

त्यागराजः - भवन्तं दृष्ट्वा सन्तुष्टोऽस्मि।



www.shenischool.in To Join sheni blog news Group SMS your Name to 9447490316

गोविन्दमारार्  -स्वामिन्! भवतः समक्षं कीर्तनमेकम् आलपामि।

( त्यागराजसमक्षं गोविन्दमारार् षट्कालेषु आलपति)

त्यागराजः  - आश्चर्यम् ! भोः ! ..................................?

गोविन्दमारार्  -आम्, गुरुकृपया अहं षट्कालेषु अपि आलपामि।

त्यागराजः  -................................. ।

**XV) सूचनानुसारं कुमारसम्भवं काव्यम् अधिकृत्य लघुटिप्पणीं लिखत।**

**सूचनाः-** पञ्चमहाकाव्यम् - कालिदासः - हिमवान्- पर्वती -देवर्षयः - परमेश्वरः- विववाहाभ्यर्थना। ।

**XVI) खण्डिकां पठित्वा अधोदत्तानां प्रश्नानाम् उत्तरं लिखत ।**

जयदेवकविना विरचितं स्त्रोत्रकाव्यं भवति गीतगोविन्दम्। काव्यमिदं केरलेषु अष्टपदी इति प्रसिद्धम् अस्ति। एकैकमपि पद्यम् अष्टपदयुक्तं इत्यतः अष्टपदी इति च व्यवह्रियते। केरलीयदेवालयेषु सोपानस्य समीपं स्थित्वा गीतमिदम् आलपति। अतः सोपानसङ्गीतम् इति अपरमपि नामान्तरं च अस्य गीतस्य भवति।

क) गीतगोविन्दस्य कर्ता कः ?

ख) केरलेषु गीतगोविन्दम् केन नाम्ना प्रसिद्धं भवति?

ग) सोपानसङ्गीतमिति प्रसिद्धेः कारणं किम् ?

घ) खण्टिकातः क्त्वान्तं पदं चित्वा सिखत।

**XVII) प्रादेशिकभाषया लिखत।** **1x5=5**

विद्वान् फादर् जोण् कुन्नप्पल्लि महाशयेन विरचितः ग्रन्थः भवति प्रक्रियाभाष्यम्। अष्टाध्यायी नाम संस्कृतव्याकरणग्रन्थस्य केरलीयव्याख्यानमस्ति ग्रन्थोऽयम्। पाणिनीयसूत्रं विना संस्कृतव्याकरणस्य अध्ययनाय अनेन शक्यते। तथापि पाणिनीयसूत्राणां सामान्यज्ञानमपि अस्मात् लभ्यते। एवम् उभयरीत्या संस्कृतव्याकरणस्य अवबोधनाय सहायकं भवति प्रक्रियाभाष्यम्।।

**** **** ****

www.shenischool.in To Join sheni blog news Group SMS your Name to 9447490316